नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते। मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे ।।

ॐ नमो वेङ्कटेशाय।

अस्मच्छ्रीगुरुचरणारविन्दाभ्यां नमः।

अत्र त्रिदिवसात्मकराष्ट्रियसंगोष्ठ्यां तृतीयदिने मञ्चे विराजमानेभ्यः सत्राध्यक्षेभ्यः
डा. यन्.आर्. सौम्यनारायणन् महोदयेभ्यः,
शोधपत्रप्रस्तोतृभ्यः सञ्चालकेभ्यः **ब्रह्मश्री डा. के. पुरुषोत्तमाचार्युलु** महोदयेभ्यः,
संयोजकेभ्यः **यन्.आर्.यस्. नरसिंह**महोदयेभ्यः
एवम् उपस्थितेभ्यः सर्वेभ्यः मान्यपण्डितवर्येभ्यः मे हार्दान् प्रणामान् समर्पयामि। शोधछात्रेभ्यः छात्रेभ्यश्च मे शुभाभिवन्दनानि।
अथ **"वररुचिप्रणीतप्राकृतप्रकाशदिशाऽस्मच्छब्दरूपसिद्धिप्रक्रिया"** इत्यभिधं मम शोधपत्रमत्र प्रस्तोतुमिच्छामि।

वररुचिप्रणीतप्राकृतप्रकाशदिशाऽस्मच्छब्दरूपसिद्धिप्रक्रिया

- **डा. पठान् महम्मद् वलि खान्,**

S.V. Vedic University, TPT

उपोद्घातः (Introduction)

धर्मार्थकाममोक्षाणां प्राप्त्युपायार्थं सन्ति बहवः प्रबन्धाः शास्त्राणि च, तेषु मन्दबुद्धिभ्यस्तु दृश्यकाव्यान्येवात्यन्तोपकारीणि। तानि हि झटिति दर्शनमात्रेणैवानन्दसन्दोहजनकानि सदुपदेशं ग्राहयन्ति। उक्तं हि भरतमुनिना स्वनाट्यशास्त्रे -

सर्वशास्त्रार्थसम्पन्नं सर्वशिष्यप्रवर्तकम्।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्।। 1.15 ।। इति।

स्वयं ब्रह्मा दैत्यान् सान्त्वयन् -

भवतां देवतानां च शुभाशुभविकल्पकः।
कर्मभावान्वयापेक्षी नाट्यवेदो मया कृतः।। 1.106 ।। इति,

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद्भविष्यति।। 1.115 ।। इति चेत्याह।

तानि च दृश्यकाव्यानि संस्कृत-प्राकृतमयानि भवन्ति। तदाह - **नानादेशसमुत्थं हि काव्यं भवति नाटके** इति। संस्कृतभाषापरिज्ञानं पाणिनीयादिव्याकरणग्रन्थैः, प्राकृतभाषाज्ञानञ्च वररुच्यादीनां व्याकरणग्रन्थावलोकनात् जायते।

1. प्राकृतशब्दव्युत्पत्तिः -

प्राकृतभाषोत्पत्तौ प्राकृतशब्दव्युत्पत्तौ च पण्डितेषु अभिप्रायद्वयं वर्तते -

1.1. तत्र प्रथमा व्युत्पत्तिः -

प्रकृतिर्नाम सर्वसाधारणो जनः, तया व्यवह्रियमाणं वचनकदम्बकं प्राकृतम्। व्याकरणादिसंस्कारसम्पन्नं सत् संस्कृतमिति केचन पण्डिताः प्राकृतभाषातः संस्कृतभाषा समुदभूत् इत्यभिप्रयन्ति। तत्र -

1. प्राक् कृतम् = प्राकृतम् इति व्युत्पत्त्या केचनाचार्याः प्राचीनकाले कृतां भाषां **प्राकृतम्** इत्यभिवदन्ति। यां च भाषां बाल-महिलादिसंस्कारहीना जनाः व्यवहरन्ति तां प्राकृतमिति व्यवहरन्ति। स्त्री-बाल-वैधेयादिभिर्झटिति बोधगम्यतयाऽऽद्रीयमाणा भाषा प्राकृताभिधाना सामान्यतया प्रतीयते।

2. ततः प्राकृतमेव व्याकरणनियमैः संस्कृतं सत् संस्कृतभाषात्वेन परिणतम्।

3. वस्तुतः अमुं मतं जैनधर्मावलम्बिनः पण्डितास्समर्थयन्ति। बौद्धधर्माभिमानी स्वधर्मभाषां पालीमेव मूलभाषात्वेन यथा अङ्गीकरोति तथैव जैनधर्मानुयायिनः स्वकीयधर्मभाषां प्राकृतभाषामेव भारतीयसकलभाषाणां मूलमिति अभिप्रयन्ति।

4. “**यतिनेमिसाधुः**” इति कश्चन जैनः प्राक् पूर्वं कृतं प्राकृतम्, प्रकृतेः आगतम् प्राकृतम् इति, स्वकाव्यालङ्कारटीकायाञ्च - प्राकृतेति। सकलजगज्जन्तूनां व्याकरणादिभिरनाहतसंस्कारः सहजो वचनव्यापारः प्रकृतिः तत्र भवः सेव वा प्राकृतम् इत्यलिखत्। अपि च मेघेन वर्षितं जलम् एकाकारतया समानस्वरूपेऽपि स्थलविशेषमहिम्ना संस्कारविशेषेण च यथा विशेषरूपम् आदत्ते तथैव प्राकृतभाषाऽपि व्याकरणादिनियमविशेषैः संस्कृतभाषात्वेन विपरिणम्यते इत्यवोचत्।

5. **“गउडवहो”** इति प्राकृतग्रन्थकर्तुः वाक्पतिराजस्य मतानुसारं प्राकृतमेव सकलभाषाणां मूलस्थानम्। तस्य कथनानुसारं यथा समुद्रात् नद्यः प्रादुर्भवन्ति, पुनश्च तत्रैव लीयन्ते तथैव सकलभाषाणां जननी प्राकृतमेव। अन्ते सकला: भाषास्तत्रैव (प्राकृते) प्रलीयन्ते। इति वदति। तद्यथा-

समलावो इमं वाया विसंति एत्तो य णेंति वायाओ।
एंति समुदं चिअ णेंति सायराओ च्चिअ जलाइं ।। (गउडवहो) इति।

6. केचित्तु - प्रकृत्या स्वभावेन सिद्धं प्रकृतम्। ततश्च वैयाकरणैः साधितं हि संस्कृतमित्यभिधीयते। अतो न संस्कृतमूलकं प्राकृतम्। प्रत्युत प्राकृतमूलकमेव संस्कृतम् - इत्याहुः।

7. अपरे तु - वेदमूलकमिदम्। तनत्वनादिप्रत्ययानाम्, अम्हे-अस्मे इत्यादिपदानां लिङ्गवचनविभक्त्यादीनाञ्च वैदिकैः प्रयोगैः साम्यदर्शनात्, एतन्मूलकं च संस्कृतम् - इति वदन्ति।

एतेषां सर्वेषामाचार्याणां मतम् एकदेशीयाभिप्रायत्वात् न सर्वमान्यम्।

1.2. द्वितीया व्युत्पत्तिः -

केचन पण्डिताः (संस्कृतवैयाकरणाः) संस्कृतभाषातः प्राकृतभाषा समुद्भूता इत्यभिप्रयन्ति। अत्र वररुच्यादिप्राकृतव्याकरणसूत्रप्रणेतॄणामन्येषाञ्च संस्कृतप्रणयिनां विदुषां - **"प्रकृतिः संस्कृतम्, तत आगतं समुत्पन्नं वा प्राकृतम्"** इति मतम्। अपि च वैयाकरणाः एवं कथयन्ति -

1. **"प्रकृतिः संस्कृतं तत्र भवं तत आगतं वा प्राकृतम्"** इति हेमचन्द्रः।

2. **"प्रकृतिः संस्कृतं तत्र भवं प्राकृतमुच्यते। तद्भवं तत्समं चेति द्विधा।"** इति मार्कण्डेयः। अर्थात् संस्कृतं प्रकृतिः। तस्मात् संस्कृतात् उत्पन्ना भाषा प्राकृतभाषा भवति। सा प्राकृतभाषा तत्समा तद्भवा चेति द्विप्रकारा।

3. **प्रकृतेः संस्कृतात् साध्यमानात् सिद्धाच्च यद्भवेत्।**
प्रकृतस्यास्य लक्ष्यानुरोधि लक्ष्यं प्रचक्ष्महे।। इति च त्रिविक्रमदेवो वदति।

श्लोकस्यायमर्थः - प्रकृतेः = संस्कृतात् साध्यमानात् सिद्धाच्च या भाषा प्राकृतं निष्पद्यते, तस्याः प्रकृतभाषायाः लक्ष्यं नियमनाय लक्षणं वदामः। एवं संस्कृतं प्राकृतस्य मूलम् इति स्पष्टम्।

4. **"प्रकृतेः संस्कृतायाः तु विकृतिः प्राकृती मता।"** इति नरसिंहः। अत्र प्रकृतिः = संस्कृतस्य विकारभूता भाषा प्राकृतम् इति मन्यते।

5. गीतगोविन्दे रसिकसर्वस्वः - **"संस्कृतात् प्राकृतम् इष्टं ततोऽपभ्रंशभाषणम्"** इति।

6. शकुन्तलायां शङ्करोऽपि - **"संस्कृतात् श्रेष्ठं प्राकृतं जातम्, ततोऽपभ्रंशः"** इत्युदाजहार।

एवमेतेषामाचार्याणाम् उद्धरणैः स्पष्टं ज्ञायते यत् - संस्कृतं प्रकृतिः भवति। तस्याः संस्कृतभाषायाः विकृतिः = विकारभूता भाषा प्राकृतम् इति। एवञ्च संस्कृतं प्रकृतित्वात् संस्कृतात् विकृतेः प्राकृतभाषायाः उद्गमः स्पष्ट एव।

सम्प्रदायिकैस्तूभयव्युत्पत्तिमपि नाद्रियते – यदि स्वभावसिद्धं प्राकृतम्, तर्हि कोऽसौ स्वभावः कीदृशश्च येनेदृगेव भाषणं स्यात् किं समवेतश्च। जनसमवेतश्चेद् **दैवी वाग्-व्यवकीर्णयम्** इत्यस्मदभिहिते पक्षपातः। पारमेश्वरे तु स्वभावे वैरूप्यं नोपपद्यते। न ह्यग्नौ शैत्यं क्वचिदपि कदाप्युपलभ्यते। एवं तत्तद्भाषाभेदः सुतरां नोपपद्यते। मतद्वये यत्किमप्येकतरं समीचीनमसमीचीनं वा भवतु, परं प्राकृतपदेन व्यवह्रियमाणा भाषा काऽप्यस्तीति न विप्रतिपत्तिः।

2. भाषाणां चातुर्विध्यम् -

2.1. काव्यादर्शे दण्डी -

तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं तथा।
अपभ्रंशश्च मिश्रं चेत्याहुराप्ताश्चतुर्विधम्।। इत्याह। (का.आ.1.32)

अस्यायं भावः - चतुर्विधाः हि ग्रन्थाः तत्र संस्कृतनिबद्धाः केचित्, प्राकृतनिबद्धाः केचित्, केचिदपभ्रंशनिबद्धाः, केचिदासां साङ्कर्य्येण निबद्धा मिश्राः चेति।

संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादिकम्।
आसुरादीन्यपभ्रंशो नाटकादिषु मिश्रकम्।। इति च। (का.आ.1.37)

एवं भाषाः चतुर्विधाः स्वीकृताः।

इतोऽप्यन्यैः रामतर्कवागीश-पुराणवाग्भटादिपण्डितैः भाषाणां चतुर्विध्यमङ्गीकृतम्। रुद्रटस्तु काव्यालङ्कारे - **प्राकृतं संस्कृतञ्चैतदपभ्रंश इति त्रिधा।।** इति तिस्रो विधाः भाषाः प्राह।

2.2. भरतेनोद्धृताः सप्त प्राकृतभाषाः -

नाट्यशास्त्रकारस्य भरतमुनेः काले याः सप्त प्राकृतभाषाः उपलब्धास्सन्ति तेषां नामानि, ततश्च नाटकेषु पात्राणां माध्यमेन एतासां भाषाणाम् उपयोगनियमान्यपि प्रदर्शितानि भरतमुनिना। प्राकृतस्य मुख्याः भाषाः एताः सन्ति - 1. मागधी, 2. आवन्ती (अवन्तिआ), 3. प्राच्या, 4. शौरसेनी (सूरसेनी), 5. अर्धमागधी, 6. बाह्लीका, 7. दाक्षिणात्या (दाक्षिणात्यदेशेषु महाराष्ट्रप्रदेशस्य नाम विद्यते।) चेति। एतासां भाषाणामतिरिक्ततया भरतेन नाटके प्रयुक्ताः षट् विभाषाणामपि नामनिर्देशः,

उपयोगः, उपयोगनियमाश्च प्रदर्शिताः। तद्यथा - 1. शाकारी, 2. आभीरी, 3. चाण्डाली, 4. शाबरी, 5. द्राविडी, 6. उद्रजा (ओड्री अथवा पाठभेदात् आन्ध्रजा, आन्ध्री) चेति।

क्र.सं.	प्राकृतस्य मुख्याः भाषाः	भाषाप्रयोक्तृजनाः	सप्त विभाषाः
1	**मागधी**	मागधी तु नरेद्राणाम् अन्तःपुरनिवासिनाम्।	शाबरी
2	**अवन्तिजा**	धूर्तानामप्यवन्तिजा।	आभीरी
3	**प्राच्या**	प्राच्या विदूषकादीनां	चाण्डाली
4	**शौरसेनी (सूरसेनी)**	नायिकानां सखीनां च शूरसेनाविरोधिनी।	सचरी
5	**अर्धमागधी**	चेटानां राजपुत्राणां श्रेष्ठिनां चार्धमागधी।	द्राविडी
6	**बाह्लीका**	बाह्लीकभाषोदीच्यानां तत्स्वभावश्च यो गणः।	उद्रजा
7	**दाक्षिणात्या (महाराष्ट्री)**	योधनागरकादीनां दाक्षिणात्याथ दीव्यताम्।	वनेचरी (हीना)

2.3. मार्कण्डेयकवीन्द्रेण विवेचिताः षोडशप्राकृतभाषादयः -

पौरस्यप्राकृतव्याकरणसम्प्रदाये आचार्य मार्कण्डेयकवीन्द्रः **"प्राकृतसर्वस्वम्"** इति महत्वपूर्णं ग्रन्थं व्यरचयत्। तेनात्र प्राकृतभाषाः भाषा-विभाषा-अपभ्रंश-पैशाचीभेदात् चतुर्धा विभक्ताः। तत्रैकैकस्मिन् भेदे षोडशभाषाणां शास्त्रीयं विवेचनमत्र विहितम् -

1	**प्राकृतभाषाः**	1.महाराष्ट्री, 2.शौरसेनी, 3.प्राच्या, 4.आवन्ती, 5.मागधी (अर्धमागधी) चेति पञ्चानां
2	**प्राकृतविभाषाः**	6.शाकारी, 7.चाण्डाली, 8.शाबरी, 9.आभीरिकी, 10.टाक्की (शाक्की, शाखी) चेति पञ्चानां
3	**प्राकृतापभ्रंशभाषाः**	आन्ध्रीं द्राविडीं च विना सप्तविंशतिधा च विभक्तः अपभ्रंशः। 11.नागरभाषा, 12.ब्राचडभाषा, 13.उपनागरभाषा चेति त्रयाणां
4.	**प्राकृतपैशाचीभाषाः**	14.केकयभाषा (कैकेयी), 15.शौरसेनभाषा (शौरसेनी), 16.पाञ्चालभाषा (पाञ्चाली) चेति त्रयाणां शास्त्रीयं विश्लेषणं **"प्राकृतसर्वस्वम्"** इति ग्रन्थे विहितम्।

---

3. अपभ्रंशभाषाः -

यदा च आभीर्यादयो देशभाषाः काव्यनाटकेषु निबद्धास्तदाऽपभ्रंशपदेन व्यवह्रियन्ते।

शौरसेनी च गौडी च लाटी चान्या च तादृशी।
याति प्राकृतमित्येवं व्यवहारेषु सन्निधिम्।। 1.35 ।।

आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम्।। 1.36 ।। इत्युक्तं दण्डिना काव्यादर्शे।

अपभ्रंशपदेन भारतीयाः प्रचलिता भाषा गृह्यन्ते, ताश्च काव्यनाटकेषु निबद्ध्यन्ते। उक्तं हि भरतमुनिना -

शौरसेनीं समाश्रित्य भाषा कार्या तु नाटके।
अथवा छन्दतः कार्या देशभाषाप्रयोक्तृभिः।। 17.46 ।। इति।

अधुना प्रचलिततत्तद्देशभाषास्वपि वङ्गदेशे यात्रागन्धर्वगानम्, नेपाले कूर्माचले च हरिश्चन्द्रादिनर्तनम् उपलभ्यत एव। अतः वररुचिसमयेऽपभ्रंशस्य व्यवहारानुदयात्, तस्य प्राकृतप्रकाशे प्राकृतपदेनानुल्लेखनमुचित एव।

प्राकृतभाषायाः सूत्रकर्तारः वररुचि-वाल्मीकि-हेमचन्द्र-त्रिविक्रमदेवाः चत्वारः इति तद्विदः कथयन्ति।

4. वररुचिमहामुनिः -

1. केचन पण्डिताः पाणिनिमहर्षिप्रणीतानामष्टाध्यायीसूत्राणामुपरि विरचितवन्तं वार्तिककारं कात्यायनमुनिमेव वररुचिमहामुनित्वेन ब्रुवन्ति। अयमेव प्राकृतप्रकाशकारः इति चाभिप्रयन्ति।

2. अपरस्मात् विचारात् प्राकृतप्रकाशकारः वररुचिः, वार्तिककारकात्यायनात् भिन्नः इति ज्ञायते। एतयोः द्वयोः नामसाम्यं विहाय द्वावपि एक एव इति कथनेऽन्यप्रमाणानि नोपलभ्यन्ते।

एवं वररुचिनाम्ना द्वौ पण्डितवरौ आस्ताम् - 1. वार्तिककारः कात्यायनमहर्षिः। 2. प्राकृतप्रकाशकारः वररुचिः चेति। एतौ द्वावपि एकः एवेति **प्रथमपक्षः**। द्वावपि भिन्नाविति **द्वितीयपक्षः**।

4.1. वररुचिमहामुनेः कालविचारः -

कदायं वररुचिः समभवत्, कदा चैतत्सूत्राणि प्रणिनाय इत्यादिवृत्तं सुष्ठु न निश्चेतुं शक्यते। तथाहि -

धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटखर्परकालिदासाः।
ख्यातो वराहमिहितो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य।। इति।

अन्यत्र - **पाणिनिं सूत्रकारं च भाष्यकारं पतञ्जलिम्।**
वाक्यकारं वररुचिं प्रणतोस्मि मुनित्रयम्।।

इति पाणिनिसमकालिकः कात्यायनापराभिधः प्रतीयते। महाभाष्यकारेणापि तेन प्रोक्तम् (पा.सू. 4.3.107) इति सूत्रे "वररुचिना प्रोक्तो ग्रन्थः वाररुचः" इति चोदाहृतम्।

तथा च प्राकृतमञ्जर्याम् -

प्रसीदन्तु च वाचस्ता यासां माधर्यमुच्छ्रितम्।
प्राकृतच्छद्मना चक्रे कात्यायनमहाकविः।।

व्याकर्तुं प्राकृतत्वेन गिरः परिणतिं गताः।
कोऽन्यः शक्तो भवेत् तस्मात् कवेः कात्यायनादृते।। इति।

अयमेव कात्यायनापराभिख्यः श्रौतसूत्रकारः पाणिनीयसूत्रवार्तिककारो रूपमालाप्रणेता बृहत्संहितानिर्माता चेत्यत्र दृढतरप्रमाणाभावेऽपि विरोधं नाकलयन्ति सूरयः। कथासरित्सागर-कथामञ्जर्यादावुपवर्णितोऽपि वररुचिर्विलक्षणप्रतिभाशालित्वेन नोक्तार्थे विरोधमवतारयतीति विवेचकैर्विवेचनीयम्।।

वररुचेः प्राकृतप्रकाशसूत्राणामुपरि सूत्रप्रकाशवृत्तेः प्रणेता भामहः कदा समभवत् इति निर्णेतुम् अतिदुरूहतां गतः। अलङ्कारलक्षणम् इति ग्रन्थप्रणेता काश्मीरदेशीयः परमप्राचीनाचार्यः इति झल्लकीकरोपाह्वैर्वामनाचार्यैः निरूपितम्। अनेनापि वररुचेः प्राचीनत्वं प्रतीयते।

1. कात्यायनमहर्षिः वैदकमुनिः, सः पाणिनेः समकालिकः। कात्यायनमहर्षेः जन्मस्थानं कौशाम्बीनगरम्। एवं पाणिनिमहर्षिः क्रीस्तोः पूर्वं 800, कात्यायनश्च क्रीस्तोः पूर्वं 315 इति ज्ञायते।

---

2. चण्डस्य **"प्राकृतलक्षणम्"** इति ग्रन्थात् प्राकृतप्रकाशग्रन्थस्य प्राकृतव्याकरणं सुविस्तृतम्, विकसितम्, विशदञ्च चकास्ति। अतः **"प्राकृतप्रकाशः"** इति ग्रन्थः प्राकृतलक्षण-ग्रन्थस्यानन्तरकाले व्यरचयत् इति निश्शङ्कं वक्तुं शक्नुमः।

3. वररुचेः कालः क्रीस्तोः परं तृतीय-चतुर्थशतकम् इति च सम्भावना समुचितेव भाति।

4. द्वारकाप्रसादद्विवेदी इति पण्डितः स्वसंस्कृतशब्दार्थकौस्तुभग्रन्थस्य परिशिष्टे पतञ्जलेः कालं क्रीस्तोः पूर्वं 140 तः 120 पर्यन्तमिति निर्णायि।

5. व्योमशेखरगौडः, बोट्लिङ्ग्, माक्स्-मुल्लर् इत्येतेषामभिप्रायानुसारं सोमदेवस्य कथासरित्सागरम् (क्री.श. 1100), कल्हणस्य राजतरङ्गिणीग्रन्थाधारेण च विविधप्रमाणैः कात्यायनमहर्षेः समयः क्रीस्तोः पूर्वं 350 इति निश्चप्रचम्।

6. प्राकृतवैयाकरणेषु सर्वप्रथमं नाम वररुचेः लभ्यते। अस्य कालः सप्तमशताव्दः इति वदन्ति। अस्य व्याकरणग्रन्थः प्राकृतप्राकशः इति, तत्र द्वादशपरिच्छेदास्सन्ति इति चाभिप्रयन्ति।

4.2. वररुचिमहर्षेः कृतयः -

1. तैत्तिरीयप्रातिशाख्यम्, 2. निरुक्तसमुच्चयः, 3. लिङ्गविशेषविधिः, 4. प्रयोगविधिः, 5. कातन्त्र-उत्तरार्धम्, 6. प्राकृतप्रकाशः, 7. कोशः, 8. उपसर्गसूत्रम्, 9. पत्रकौमुदी, 10. विद्यासुन्दर-प्रसङ्गकाव्यम्, 11. सारसमुच्चयः, 12. लिङ्गवृत्तिविचारः - चेति ज्ञायन्ते।

4.3. प्राकृतप्रकाशः -

प्राकतभाषायाः अन्तर्गतानां पदानां व्युत्पत्तिं प्रदर्शयन्, चण्डस्य प्रायः (200) द्विशतवर्षानन्तरं वररुचिमहामुनिः **प्राकृतप्रकाशः** इति ग्रन्थरचनाम् अकरोत्। अयं प्राकृतव्याकरणग्रन्थः अत्यन्तं लोकप्रियः। अत्र द्वादश (12) परिच्छेदाः सन्ति। 1-9 परिच्छेदेषु (1) महाराष्ट्रीप्राकृतस्य, दशमपरिच्छेदे (2) पैशाचीप्राकृतस्य, एकादशतमपरिच्छेदे (3) मागधीप्राकृतस्य, द्वादशतमपरिच्छेदे (4) शौरसेनीप्राकृतस्य च व्याकरणनियमाः सूत्रिताः।

वररुचिमतानुसारं मूलप्राकृतम् इत्युक्ते महाराष्ट्रीप्राकृतमेव। अत एव अस्य ग्रन्थस्य चतुर्भागेषु भागत्रयं यावत् महाराष्ट्रीप्राकृतभाषामेव साङ्गोपाङ्गतया वर्णितवान्। दण्याचार्येणापि महाराष्ट्रीप्राकृतमेव सर्वोत्कृष्टप्राकृतभाषात्वेन प्रदर्शितः। तद्यथा -

महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः।
सागरः सूक्तिरत्नानां सेतुबन्धादियन्मयम्।। (का.आ.1.34)

अत्र प्राकृतप्राकशे अङ्गविधानम्, स्वरविधानम्, व्यञ्जनविधानम्, सुबन्त-तिङन्तादीनां वर्णनं च सुविस्तरं लभ्यते। अन्यप्राकृतभाषाणां वैशिष्ट्यं संक्षिप्ततया एकैकस्मिन् परिच्छेदे वर्णितम्। प्राकृतभाषाजिज्ञासूनां कृते अयं ग्रन्थः सूत्रेषु उपनिबद्धः। अत्र ग्रन्थे सूत्रसंख्या भामहकृतमनोरमाव्याख्यानुसारं - 487 अस्ति। अस्य ग्रन्थस्य टीकाः अनेकास्सन्ति। टीकानां बाहुल्यादस्य ग्रन्थस्य लोकप्रियत्वं स्फुटं भवति। जिज्ञासुभ्योऽयं ग्रन्थः करतलामलक इव भवति।

प्राकृतप्रकाशटीकाः -

वररुचिप्रणीतस्य प्राकृतप्रकाशस्य प्राचीनाः चतस्रो व्याख्याः समुपलभ्यन्ते -

1. भामहकृता मनोरमावृत्तिः - अत्यन्तप्राचीना। अत्र सूत्राणां पूर्णा संख्या चतुःशत-सप्ताशीतिमितास्ति।

2. श्रीकात्यायनप्रणीता प्राकृतमञ्जरीव्याख्या पद्यमयी नवपरिच्छेदात्मिका।

3. वसन्तराजकृता प्राकृतसञ्जीवनी - काटयवेमपालकः कुमारगिरेर्नृपतिरेकः। विजयभूपतेः पुत्रः शिवराजस्यानुजः, चन्द्रदेवमैथिलाज्ञया शकुनार्णवनिर्मिता कश्चिदन्यः। सञ्जीवनीकारस्तूभयो-रन्यतरोऽपि नास्तीति प्रतिभाति।

4. सदानन्दनिर्मिता सुबोधिनी चेति।

5. अस्मच्छब्दरूपसिद्धिप्रक्रिया -

आचार्यवररुचिना प्राकृतप्रकाशस्य षष्ठपरिच्छेदे सर्वनामशब्दानां विधानं कृतम्। सर्वनामशब्देषु विशिष्य - सर्व, इदम्, एतद्, किम्, यत्, तद्, अदस्, युष्मद्, अस्मद्, द्वि, त्रि, चतुर् इति पुंलिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गशब्दानां रूपसिद्धिप्रक्रिया **"सर्वादेर्जस एत्वम्"** (प्रा.प्र.सू.6.1) इति सूत्रात्, **"चतुर्थ्याः षष्ठी"** (प्रा.प्र.सू.6.64) इति सूत्रपर्यन्तं चतुष्षष्टि (64) सूत्रेषु प्रदर्शिता।

तत्र च युष्मदस्मच्छब्दरूपाणां विश्लेषणात् प्राक् **"पदस्य"** (प्रा.प्र.सू.6.25) इत्यधिकारसूत्रम् उक्तम्। "अधिकारोऽयम् आशब्दविधानात्। यदित ऊर्ध्वमनुक्रमिष्यामः, पदस्य तद्भवतीत्येवं वेदितव्यम्। तच्च तत्रैवोदाहरिष्यामः।" इति तस्य सूत्रस्य भामहाचार्यप्रणीता मनोरमावृत्तौ। "अधिकारोयम्। द्वेर्दो इत्यतः प्राक् यत्कार्यं तत्सुबन्तस्य पदस्य स्थाने भविष्यतीत्यधिकृतं वेदितव्यम्" - इति महामहोपाध्यायश्रीमथुराप्रसाददीक्षितविरचिता चन्द्रिकाव्याख्यायाम्।

अस्मच्छब्दरूपाणां च विधानम् **"अस्मदो हमहमहअं सौ"** इति (40) चत्वारिंशत्तमसूत्रात् **"अम्हेसु सुपि"** इति (53) त्रयःपश्चाशत्तमसूत्रपर्यन्तं चतुर्दशसु सूत्रेषु कृतम्। तदत्र अस्मच्छब्दरूपसिद्धिप्रक्रिया विस्तरशो व्याख्यास्यते -

अस्मदो हमहमहअं सौ॥ (प्रा.प्र.सू.6.40)

"अस्मदः पदस्य सौ परतो हं, अहं, अहअं इत्येत आदेशा भवन्ति। हं, अहं, अहअं करेमि (12-15 कृञ्= कर, 7-3 मि, 7-34 एत्वम्" - इति मनोरमावृत्तिः।

"सुप्रत्यये सिद्धस्य अस्मदः अहमित्यस्य हं, अहं, अहअं एते त्रय आदेशा भवन्ति। हं जाणामि। अहं जानामि" - इति श्रीमथुराप्रसाददीक्षितविरचितचन्द्रिकाव्याख्यायाम्।

व्याख्यानम् -

पदच्छेदः - अस्मदः, हमहमहअं, सौ - इति च्छेदः। त्रिपदमिदं सूत्रम्।

पदार्थः - सौ = सु इति प्रथमाविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, **अस्मदः -** अस्मच्छब्दस्य स्थाने (सु इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य अहम् इति पदस्य स्थाने) **हमहमहअं** = **हं, अहं, अहअं** इति त्रयः आदेशाः स्युः।

सूत्रार्थः - अस्मद् शब्दात्, सु इति प्रथमाविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, सु इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **अहम्** इति पदस्य स्थाने, **हं, अहं, अहअं** इति त्रय आदेशाः स्युः। अथ रूपसिद्धिप्रक्रिया -

1.अहम् - हं, अहं, अहअं।

अस्मच्छब्दात् प्रथमाविभक्ति-एकवचनविवक्षायां सुप्रत्यये, अस्मद् + सु इति स्थिते, **अस्मदो हमहमहअं सौ** (प्रा.प्र.सू.6.40) इति प्रस्तुतसूत्रेण सु-सहितस्य अस्मद् इति शब्दस्य प्रथमाविभक्ति-एकवचनरूपस्य **अहम्** इति पदस्य स्थाने **हं, अहं, अहअं** इत्येतेषाम् आदेशे **हं, अहं, अहअं** इति त्रीणि रूपाणि सिद्ध्यन्ति।

अहम्मिरमि च॥ (प्रा.प्र.सू.6.41)

"अमि परतोऽस्मदः पदस्य अहम्मि इत्ययमादेशो भवति, सौ च। अहम्मि पेक्ख। अहम्मि करेमि। मां प्रेक्षस्व। अहं करोमि" - इति मनोरमावृत्तिः।

"**अम्मिरमि च -** अमि, सुप्रत्यये च सिद्धस्य अस्मदः पदस्य माम्, अहमित्येतयोः अम्मि इत्यादेशः स्यात्। अम्मि पाससि। मां पश्यसि। अम्मि कहेमि। अहं कथयामि। "सावस्मदो भवत्यत्र 'म्मि' इत्येष च पञ्चमः"। म्मि = अहम्" - इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - अहम्मिः, अमि, च - इति च्छेदः। त्रिपदमिदं सूत्रम्।

पदार्थः - अमि = अम् इति द्वितीयाविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, (**अस्मदः -** अस्मच्छशब्दस्य स्थाने - अम् इति प्रत्ययसहिते अस्मदः स्थाने अर्थात् सिद्धस्य माम् इति पदस्य स्थाने) **अहम्मिः** = **अहम्मि** इति आदेशः (स्यात्।), **च** = **अपि च** सु इति प्रत्यये परे अहं इत्यस्य स्थाने अम्मि इत्यादेशः स्यात्।

सूत्रार्थः - अस्मद् शब्दात्, अम् इति द्वितीयाविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, अम् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **माम्** इति पदस्य स्थाने, **अहम्मि** इति आदेशः स्यात्। सु इति प्रत्यये परेऽपि। अथ रूपसिद्धिप्रक्रिया -

1.माम् - अहम्मि।

अस्मद् शब्दात् द्वितीयाविभक्ति-एकवचनविवक्षायाम् अम् प्रत्यये, अस्मद् + अम् इति स्थिते, **अहम्मिरमि च** (प्रा.प्र.सू.6.41) इति प्रस्तुतसूत्रेण अम्-सहितस्य अस्मद् इति शब्दस्य द्वितीयाविभक्ति-एकवचनरूपस्य **माम्** इति पदस्य स्थाने **अहम्मि** इत्यादेशे **अहम्मि** इति रूपं सिद्ध्यति।

2.अहम् - अहम्मि। हं, अहं, अहअं। म्मि।

अस्मद् इति शब्दात् प्रथमाविभक्ति-एकवचनविवक्षायां सु प्रत्यये, अस्मद् + सु इति स्थिते, **अस्मदो हमहमहअं सौ** (प्रा.प्र.सू.6.40) इति प्रस्तुतसूत्रेण सु-सहितस्य अस्मद् इति शब्दस्य प्रथमाविभक्ति-एकवचनरूपस्य **अहम्** इति पदस्य स्थाने **हं, अहं, अहअं** इत्यादेशे **हं, अहं, अहअं** इति त्रीणि रूपाणि सिद्ध्यन्ति। तथा अस्मद् + सु इति स्थिते, **अहम्मिरमि च** (प्रा.प्र.सू.6.41) इति प्रस्तुतसूत्रेण सु-सहितस्य अस्मच्छब्दस्य प्रथमाविभक्ति-एकवचनरूपस्य **अहम्** इति पदस्य स्थाने **अहम्मि** इत्यादेशे **अहम्मि** इति रूपमपि सिद्ध्यति। एवमाहत्य **अहम्** इति पदस्य **हं, अहं, अहअं,**

अहम्मि इति चत्वारि रूपाणि सिद्ध्यन्ति। "सावस्मदो भवत्यत्र 'म्मि' इत्येष च पञ्चमः" इति कथनात् म्मि इति पञ्चमं रूपम्।

मं ममं॥ (प्रा.प्र.सू.6.42)

"अमीति वर्तते। अस्मदः पदस्य अमि परतो मं, ममं - इत्येतावादेशौ भवतः। मं, ममं पेक्ख" - इति मनोरमावृत्तिः। "**मं ममं च -** अमि सिद्धस्य मामित्यस्य एतावादेशौ स्तः। मं, ममं - मामित्यर्थः। "चत्वारोऽन्येऽस्मदोऽमि स्युर्मिमं णो अम अम्ह च"। मिमं, णो, अम, अम्ह रक्खउ। मां रक्षतु" - इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - मं ममं - इति च्छेदः। एकपदमिदं सूत्रम्।

पदार्थः - मं ममं = मं ममं च इत्येतौ आदेशौ स्तः।

सूत्रार्थः - अस्मद् शब्दात्, अम् इति द्वितीयाविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, अम् इति प्रत्ययसहिते अस्मदः स्थाने अर्थात् सिद्धस्य माम् इति पदस्य स्थाने, **मं, ममं** इत्येतौ आदेशौ अपि स्तः। अथ रूपसिद्धिप्रक्रिया –

1.माम् - मं, ममं। अहम्मि।

अस्मद् इति शब्दात् द्वितीयाविभक्ति-एकवचनविवक्षायाम् अम् प्रत्यये, अस्मद् + अम् इति स्थिते, **मं ममं** (प्रा.प्र.सू.6.42) इति प्रस्तुतसूत्रेण अम्-सहितस्य अस्मद् इति शब्दस्य द्वितीयाविभक्ति-एकवचनरूपस्य **माम्** इति पदस्य स्थाने **मं, ममं** इति द्वयोः प्रत्यययोः आदेशे **मं, ममं** इति रूपद्वयं सिद्ध्यति।

अम्हे जश्शसोः॥ (प्रा.प्र.सू.6.43)

"अस्मदः पदस्य जश्शसोः परतः अम्हे इत्ययमादेशो भवति। अम्हे आगदा। अम्हे पेक्ख" - इति मनोरमावृत्तिः। "जसि शसि सिद्धस्य अस्मदः पदस्य वयमित्यस्य अस्मानित्यस्य च अम्हे इत्यादेशो भवति। अम्हे = वयम्, अस्मानिति वा। "अम्हो, अम्ह तथैवैतौ जश्शसोरस्मदो मतौ"। अम्हो, अम्ह = वयम्, अस्मानिति वा" - इति चन्द्रिकायाम्।

व्याख्यानम् -

पदच्छेदः - अम्हे, जश्शसोः - इति च्छेदः। द्विपदमिदं सूत्रम्।

पदार्थः - जश्शसोः = अस्मद् शब्दात्, जस् एवं शस् प्रत्ययौ अनन्तरे स्थिते। **अम्हे** = अम्हे इति आदेशः स्यात्।

सूत्रार्थः - अस्मद् शब्दात्, जस्, शस् इति प्रथमा-द्वितीयाविभक्त्योः बहुवचनप्रत्यये अनन्तरे स्थिते, जस् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **वयम्** इति पदस्य स्थाने, एवं शस् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **अस्मान्, नः** इति प्रत्येकपदस्य स्थाने च, अम्हे इत्येषः आदेशः स्यात्।

अथ रूपसिद्धिप्रक्रिया –

1.वयम् - अम्हे।

अस्मद् इति शब्दस्य प्रथमाविभक्ति-बहुवचनरूपस्य विवक्षायाम् अस्मद् + जस् इति स्थिते, **अम्हे जश्शसोः** (प्रा.प्र.सू.6.43) इति प्रस्तुतसूत्रेण जस्-सहितस्य अस्मद् इति शब्दस्य प्रथमाविभक्ति-बहुवचनरूपस्य **वयम्** इति पदस्य स्थाने **अम्हे** इत्यादेशे **अम्हे** इति रूपं सिद्ध्यति।

2.अस्मान्, नः - अम्हे।

अस्मद् इति शब्दात् द्वितीयाविभक्ति-बहुवचनविवक्षायां जस्-प्रत्यये, अस्मद् + शस् इति स्थिते, **अम्हे जश्शसोः** (प्रा.प्र.सू.6.43) इति प्रस्तुतसूत्रेण शस्-सहितस्य अस्मद् इति शब्दस्य द्वितीयाविभक्ति-बहुवचनरूपस्य **अस्मान्, नः** इति एकैकपदस्य स्थाने **अम्हे** इत्यादेशे **अम्हे** इति रूपं सिद्ध्यति।

णो शसि॥ (प्रा.प्र.सू.6.44)

"अस्मदः पदस्य शसि परतो णो इत्ययमादेशो भवति। णो पेक्ख = अस्मान् प्रेक्षस्व" - इति मनोरमावृत्तिः।

"णो च शसि - शस्-प्रत्यये अस्मदः पदस्य णो इति स्यात्। णो हसइ = अस्मान् हसति" - इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - णो, शसि - इति च्छेदः। द्विपदमिदं सूत्रम्।

पदार्थः - जश्शसोः = अस्मद् शब्दात्, शस् इति द्वितीयाविभक्ति-बहुवचनप्रत्यये अनन्तरे स्थिते। **णो** = णो इत्यादेशः स्यात्।

सूत्रार्थः - अस्मद् शब्दात्, शस् इति द्वितीयाविभक्तेः बहुवचनप्रत्यये अनन्तरे स्थिते, शस् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **अस्मान्, नः** इति पदयोः स्थाने, **णो** इत्यादेशः भवति।

अथ रूपसिद्धिप्रक्रिया –

1.अस्मान्, नः - णो। अम्हे।

अस्मद् इति शब्दात् द्वितीयाविभक्ति-बहुवचनविवक्षायां शस्-प्रत्यये, अस्मद् + शस् इति स्थिते, **णो शसि** (प्रा.प्र.सू.6.44) इति सूत्रेण शस् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **अस्मान्, नः** इति प्रत्येकपदस्य स्थाने, णो इत्यादेशे **णो** इति रूपं सिद्ध्यति।

पक्षे - अस्मद् + शस् इति स्थिते **अम्हे जश्शसोः** (प्रा.प्र.सू.6.43) इति प्रस्तुतसूत्रेण जस्-सहितस्य अस्मच्छब्दस्य प्रथमाविभक्ति-बहुवचनरूपस्य **वयम्** इति पदस्य स्थाने **अम्हे** इत्यादेशे **अम्हे** इति रूपं सिद्ध्यति। इत्थं द्वितीयाविभक्तिबहुवचने **णो, अम्हे** इति द्वे रूपे सिद्ध्यतः।

आङि मे ममाइ ॥ (प्रा.प्र.सू.6.45)

"अस्मदः पदस्य आङि परतो मे, ममाइ इत्येतावादेशौ भवतः। मे कअं, ममाइ कअं" - मनोरमावृत्तिः।

"टाप्रत्यये सिद्धस्य अस्मदः पदस्य मे, ममाइ इत्यादेशौ स्तः। मे, ममाइ किअं। मया कृतमित्यर्थः" - इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - आङि, मे ममाइ - इति च्छेदः। द्विपदमिदं सूत्रम्।

पदार्थः - आङि = अस्मद् शब्दात्, आकारान्ते टा इति तृतीयाविभक्ति-एकवचनप्रत्यये अनन्तरे स्थिते। **मे, ममाइ** = **मे, ममाइ** इति द्वौ प्रत्ययौ आदेशौ स्तः।

सूत्रार्थः - अस्मद् शब्दात्, टा इति तृतीयाविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, टा इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **मया** इति पदस्य स्थाने, **मे, ममाइ** इत्यादेशौ भवतः।

अथ रूपसिद्धिप्रक्रिया –

1.मया - मे, ममाइ।

अस्मच्छब्दात् तृतीयाविभक्ति-एकवचनविवक्षायां टाप्रत्यये, अस्मद् + टा इति स्थिते, **आङि मे ममाइ** (प्रा.प्र.सू.6.45) इति सूत्रेण टा इति प्रत्ययसहिते अस्मदः स्थाने अर्थात् सिद्धस्य **मया** इति पदस्य स्थाने, मे, ममाइ इति प्रत्यययोः आदेशे **मे, ममाइ** इति रूपद्वयं सिद्ध्यति।

ङौ च मइ-मए ॥ (प्रा.प्र.सू.6.46)

“अस्मदः पदस्य ङौ परतो मइ, मए इत्येतावादेशौ भवतः। चकारात् तृतीयैकवचने च। मइ, मए ठिअ। मइ, मए कअं” इति मनोरमावृत्तिः।

“टाप्रत्यये ङिप्रत्यये सिद्धस्य अस्मदः पदस्य एतौ स्तः। मइ, मए, मया, मयि वा। “टाप्रत्ययेऽस्मदो णे, मि स्यातां द्वावपरावपि”। णे, मि = मया।।” इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - ङौ, च, मइ-मए - इति च्छेदः। त्रिपदमिदं सूत्रम्।

पदार्थः - ङौ = अस्मद् शब्दात्, ङि इति सप्तमीविभक्ति-एकवचनप्रत्यये अनन्तरे स्थिते। **मइ-मए** = **मइ, मए** इति द्वौ प्रत्ययौ आदेशौ, **च** = अपि स्तः।

सूत्रार्थः - अस्मच्छब्दात्, ङि इति सप्तमीविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, ङि इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **मयि** इति पदस्य स्थाने, एवं तृतीयाविभक्ति-एकवचनरूपस्य **मया** इत्यस्य स्थाने च **मइ, मए** इत्यादेशौ भवतः।

अथ रूपसिद्धिप्रक्रिया –

1.मयि - मइ, मए।

अस्मद्-शब्दात् सप्तमीविभक्ति-एकवचनविवक्षायां ङि प्रत्यये, अस्मद् + ङि इति स्थिते, **ङौ च मइ-मए** (प्रा.प्र.सू.6.46) इति प्रस्तुतसूत्रेण ङि इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **मयि** इति पदस्य स्थाने, मइ, मए इति प्रत्यययोः आदेशे **मइ, मए** इति रूपे सिद्ध्यतः।

2.मया - मइ, मए। मे, ममाइ।

अस्मच्छब्दात् तृतीयाविभक्ति-एकवचनविवक्षायां टा-प्रत्यये, अस्मद् + टा इति स्थिते, **ङौ च मइ-मए** (प्रा.प्र.सू.6.46) इति सूत्रेण टा इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **मया** इति पदस्य स्थाने, मइ, मए इति प्रत्यययोः आदेशे **मइ, मए** इति रूपे सिद्ध्यतः।

पक्षे - अस्मद् + टा इति स्थिते, **आङि मे ममाइ** (प्रा.प्र.सू.6.45) इति सूत्रेण टा इति प्रत्ययसहिते अस्मदः स्थाने अर्थात् सिद्धस्य **मया** इति पदस्य स्थाने, मे, ममाइ इति प्रत्यययोः आदेशे **मे, ममाइ** इति रूपद्वयं सिद्ध्यति। एवं मया इति पदस्य प्राकृते **मइ, मए, मे, ममाइ** इति चत्वारि रूपाणि।

अम्हेहिं भिसि ॥ (प्रा.प्र.सू.6.47)

“अस्मदः पदस्य भिसि अम्हेहिं इत्ययमादेशो भवति। अम्हेहिं कअं” – मनोरमावृत्तिः।

“भिसि सिद्धस्य अस्मदः पदस्य अम्हेहिं इत्यादेशः स्यात्। अम्हेहिं। “णे, अम्हे, अम्ह, अम्हाण चत्वारोऽन्येऽस्मदो भिसि”। णे, अम्हे, अम्ह, अम्हाण इति। अस्माभिरिति” - इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - अम्हेहिं, भिसि - इति च्छेदः। द्विपदमिदं सूत्रम्।

पदार्थः - भिसि = अस्मद् शब्दात्, भिस् इति तृतीयाविभक्ति-बहुवचनप्रत्यये अनन्तरे स्थिते। **अम्हेहिं** = **अम्हेहिं** इति आदेशः स्यात्।

सूत्रार्थः - अस्मच्छब्दात्, भिस् इति सप्तमीविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, भिस् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **मया** इति पदस्य स्थाने **अम्हेहिं** इत्यादेशः स्यात्।

अथ रूपसिद्धिप्रक्रिया –

1.अस्माभिः - अम्हेहिं।

अस्मच्छब्दस्य तृतीयाविभक्ति-बहुवचनविवक्षायां भिस्-प्रत्यये अस्मद् + भिस् इति स्थिते, **अम्हेहिं भिसि** (प्रा.प्र.सू.6.47) इति सूत्रेण भिस् इति प्रत्ययसहिते अस्मदः स्थाने अर्थात् सिद्धस्य **अस्माभिः** इति पदस्य स्थाने, अम्हेहिं इति आदेशे **अम्हेहिं** इति रूपं सिद्ध्यति।

मत्तो-मइत्तो-ममादो-ममादु-ममाहि ङसौ॥ (प्रा.प्र.सू.6.48)

"अस्मदः पदस्य ङसौ परत एत आदेशा भवन्ति। मत्तो गदो। मइत्तो, ममादो, ममादु, ममाहि गदो। (स्पष्टानि, क्तान्तस्य गमेः 12-3 त् = द्, 5-1 ओ)" – इति मनोरमावृत्तिः।

"मत्तो-मइत्तो-ममाओ-ममाउ-ममाहि ङसौ - ङसौ सिद्धस्य अस्मदः पदस्य एते पञ्च स्युः। मत्तो, मइत्तो इत्यादयः। मद् इत्यर्थः" - इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - मत्तो-मइत्तो-ममादो-ममादु-ममाहि, ङसौ - इति च्छेदः। द्विपदमिदं सूत्रम्।

पदार्थः - ङसौ = अस्मद् शब्दात्, ङसि इति पञ्चमीविभक्ति-एकवचनप्रत्यये अनन्तरे स्थिते। **मत्तो-मइत्तो-ममादो-ममादु-ममाहि** = **मत्तो, मइत्तो, ममादो, ममादु, ममाहि** इति पञ्च आदेशाः स्युः।

सूत्रार्थः - अस्मच्छब्दात्, ङसि इति पञ्चमीविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, ङसि इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **मत्** इति पदस्य स्थाने **मत्तो, मइत्तो, ममादो, ममादु, ममाहि** इति पञ्चादेशाः भवन्ति।

अथ रूपसिद्धिप्रक्रिया –

1.मत् - मत्तो, मइत्तो, ममादो, ममादु, ममाहि।

अस्मच्छब्दात् पञ्चमीविभक्तेः एकवचनविवक्षायां ङसि प्रत्यये, अस्मद् + ङसि इति स्थिते, **मत्तो-मइत्तो-ममादो-ममादु-ममाहि ङसौ** (प्रा.प्र.सू.6.48) इति प्रस्तुतसूत्रेण ङसि इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **मत्** इति पदस्य स्थाने, **मत्तो, मइत्तो, ममादो, ममादु, ममाहि** इत्यादेशे **मत्तो, मइत्तो, ममादो, ममादु, ममाहि** इति पञ्च रूपाणि सिद्ध्यन्ति।

पक्षे - **ममादो, ममादु** इत्यनयोः **कगचजतदपयवां प्रायो लोपः** (प्रा.प्र.सू.2.2) इति सूत्रात् दकारलोपे **ममाओ, ममाउ** इति रूपे सिद्ध्यतः।

अम्हाहिन्तो-अम्हासुन्तो भ्यसि॥ (प्रा.प्र.सू.6.49)

"अस्मदः पदस्य भ्यसि परतो अम्हाहिन्तो, अम्हासुन्तो इत्येतावादेशौ भवतः। अम्हाहिन्तो, अम्हासुन्तो गदो" – इति मनोरमावृत्तिः।

"अस्मभ्यमित्यस्य एतौ स्तः। अम्हाहिन्तो अम्हासुन्तो अण्णो। "अम्हेहिन्तो च अम्हेहि अम्हेन्तो वास्मदो भ्यसि"। अस्मादित्यर्थः" - इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - अम्हाहिन्तो-अम्हासुन्तो, भ्यसि - इति च्छेदः। द्विपदमिदं सूत्रम्।

पदार्थः - भ्यसि = अस्मच्छब्दात्, भ्यस् इति पञ्चमीविभक्ति-बहुवचनप्रत्यये अनन्तरे स्थिते। **अम्हाहिन्तो-अम्हासुन्तो** = **अम्हाहिन्तो, अम्हासुन्तो** इति द्वौ आदेशौ स्तः।

सूत्रार्थः - अस्मद् शब्दात्, भ्यस् इति पञ्चमीविभक्तेः बहुवचनप्रत्यये अनन्तरे स्थिते, भ्यस् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **अस्मत्** इति पदस्य स्थाने **अम्हाहिन्तो, अम्हासुन्तो** इति द्वौ आदेशौ स्तः। अथ रूपसिद्धिप्रक्रिया –

1.अस्मत् - अम्हाहिन्तो, अम्हासुन्तो।

अस्मच्छब्दात् पञ्चमीविभक्ति-बहुवचनविवक्षायां भ्यस् प्रत्यये, अस्मद् + भ्यस् इति स्थिते, **अम्हाहिन्तो-अम्हासुन्तो भ्यसि** (प्रा.प्र.सू.6.49) इति प्रस्तुतसूत्रेण भ्यस् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **अस्मत्** इति पदस्य स्थाने, **अम्हाहिन्तो, अम्हासुन्तो** इति आदेशे **अम्हाहिन्तो, अम्हासुन्तो** इति द्वे रूपे सिद्ध्यतः।

मे-मम-मह-मज्झ ङसि॥ (प्रा.प्र.सू.6.50)

"अस्मदः पदस्य ङसि परत एत आदेशा भवन्ति। मे धणं। मम, मह, मज्झ धणं" - इति मनोरमावृत्तिः।

"ङसि अस्मदः सिद्धस्य ममेत्यस्य एते स्युः। मे, मम, मह, मज्झ पुत्तो। मम पुत्रः" - इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - मे-मम-मह-मज्झ, ङसि - इति च्छेदः। द्विपदमिदं सूत्रम्।

पदार्थः - ङसि = अस्मद् शब्दात्, ङस् इति षष्ठीविभक्ति-एकवचनप्रत्यये अनन्तरे स्थिते। **मे-मम-मह-मज्झ** = **मे, मम, मह, मज्झ** इति चत्वारः आदेशाः स्युः।

सूत्रार्थः - अस्मद् शब्दात्, ङस् इति षष्ठीविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, ङस् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **मम, मे** इति प्रत्येकस्य पदस्य स्थाने **मे, मम, मह, मज्झ** इति चत्वारः आदेशाः स्युः।

अथ रूपसिद्धिप्रक्रिया –

1.मम, मे - मे, मम, मह, मज्झ।

अस्मच्छब्दात् षष्ठीविभक्ति-एकवचनविवक्षायां ङस्-प्रत्यये, अस्मद् + ङस् इति स्थिते, **मे-मम-मह-मज्झ ङसि** (प्रा.प्र.सू. 6.50) इति प्रस्तुतसूत्रेण ङस् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **मम, मे** इति पदयोः स्थाने, **मे, मम, मह, मज्झ** इति आदेशे **मे, मम, मह, मज्झ** इति चत्वारि रूपाणि सिद्ध्यन्ति।

मज्झणो-अम्ह-अम्हाणमम्हे आमि॥ (प्रा.प्र.सू.6.51)

"अस्मदः पदस्य आमि परत एत आदेशा भवन्ति। मज्झणो, अम्ह, अम्हाणं, अम्हे धणं। अस्माकं धनम्" – इति मनोरमावृत्तिः।

"णो अण्ह अम्हाण अम्हे आमि - आमि अस्मदः सिद्धस्य अस्माकमित्यस्य एते स्युः। णो, अम्ह, अम्हाण, अम्हे वल्लहो। अस्माकं वल्लभः" – इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - मज्झणो-अम्ह-अम्हाणमम्हे, आमि - इति च्छेदः। द्विपदमिदं सूत्रम्।

पदार्थः - आमि = अस्मद् शब्दात्, आम् इति षष्ठीविभक्ति-बहुवचनप्रत्यये अनन्तरे स्थिते। **मज्झणो-अम्ह-अम्हाणमम्हे** = **मज्झणो, अम्ह, अम्हाणं, अम्हे** इति चत्वारः आदेशाः स्युः।

सूत्रार्थः - अस्मद् शब्दात्, आम् इति षष्ठीविभक्तेः बहुवचनप्रत्यये अनन्तरे स्थिते, आम् इति प्रत्ययसहिते अस्मदः स्थाने अर्थात् सिद्धस्य **अस्माकम्** इति पदस्य स्थाने **मज्झणो, अम्ह, अम्हाणं, अम्हे** इति चत्वारः आदेशाः स्युः। अथ रूपसिद्धिप्रक्रिया -

1.मम, मे - मे, मम, मह, मज्झ।

अस्मच्छब्दात् षष्ठीविभक्ति-बहुवचनविवक्षायाम् आम्-प्रत्यये, अस्मद् + आम् इति स्थिते, **मज्झणो-अम्ह-अम्हाणमम्हे आमि** (प्रा.प्र.सू.6.51) इति प्रस्तुतसूत्रेण आम् इति प्रत्ययसहिते अस्मदः स्थाने अर्थात् सिद्धस्य **अस्माकम्, नः** इति पदयोः स्थाने, **मज्झणो, अम्ह, अम्हाणं, अम्हे** इति आदेशे **मज्झणो, अम्ह, अम्हाणं, अम्हे** इति चत्वारि रूपाणि सिद्ध्यन्ति।

ममम्मि ङौ॥ (प्रा.प्र.सू.6.52)

"अस्मदः पदस्य ङौ परतौ ममम्मि इत्यादेशो भवति। ममम्मि ठिअं। पूर्वोक्तौ मइ, मए इत्येतौ च" – इति मनोरमावृत्तिः।

"ममम्मि च - ङिप्रत्यये सिद्धस्य अस्मदः पदस्य मयीत्यस्य ममम्मि इति स्यात्। चकारात् पूर्वोक्तावपि। मइ, मए, ममम्मि। मयि इति" – इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - ममम्मि, ङौ - इति च्छेदः। द्विपदमिदं सूत्रम्।

पदार्थः - ङौ = अस्मद् शब्दात्, ङि इति सप्तमीविभक्ति-एकवचनप्रत्यये अनन्तरे स्थिते। **ममम्मि** = **ममम्मि** इति आदेशः स्यात्।

सूत्रार्थः - अस्मद् शब्दात्, ङि इति सप्तमीविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, ङि इति प्रत्ययसहिते अस्मदः स्थाने अर्थात् सिद्धस्य **मयि** इति पदस्य स्थाने **ममम्मि** इत्यादेशः स्यात्।

अथ रूपसिद्धिप्रक्रिया –

1.मयि - ममम्मि। मइ, मए।

अस्मच्छब्दात् सप्तमीविभक्ति-एकवचनविवक्षायां ङि-प्रत्यये, अस्मद् + ङि इति स्थिते, **ममम्मि ङौ** (प्रा.प्र.सू.6.52) इति प्रस्तुतसूत्रेण ङि इति प्रत्ययसहिते अस्मदः स्थाने अर्थात् सिद्धस्य **मयि** इति पदस्य स्थाने, **ममम्मि** इत्यादेशे **ममम्मि** इति रूपं सिद्ध्यति।

पक्षे - अस्मद् + ङि इति स्थिते **ङौ च मइ, मए** (प्रा.प्र.सू.6.46) इति पूर्वोक्तसूत्रेण ङि इति प्रत्ययसहिते अस्मदः स्थाने अर्थात् सिद्धस्य **मयि** इति पदस्य स्थाने, **मइ, मए** इत्यादेशे **मइ, मए** इति रूपे सिद्ध्यतः।

अम्हेसु सुपि॥ (प्रा.प्र.सू.6.53)

"अस्मदः पदस्य सप्तमीबहुवचने सुपि परतः अम्हेसु इत्ययमादेशो भवति। अम्हेसु ठिअं" - इति मनोरमावृत्तिः।

"सुपि सिद्धस्य अस्मदः पदस्य अम्हेसु इति स्यात्। अम्हेसु मई ठिआ। "अम्हासु इति चादेशो द्वितीयोऽप्यस्मदः सुपि"। अम्हासु सद्धा। युष्मदस्मदव्ययमलिङ्गम्। त्रिष्वपि लिङ्गेषु साम्यम्। "बिन्दुष्टामोर्ण इत्यादौ सन्नसन्नपि वा क्वचित्"। धम्मेणं, धम्मेण। जम्माणं, जम्माण। कम्मेहिं,

कम्मेहि। गामाउं, गामाउ। सरेसुं, सरेसु। तुज्झं, तुज्झ। अम्हेहिं, अम्हेहि। महं, मह। इत्यादौ लक्ष्यानुसारेण अबिन्दुष्वपि बिन्दुसद्भावोऽवगन्तव्यः” - इति चन्द्रिका।

व्याख्यानम् -

पदच्छेदः - अम्हेसु, सुपि - इति च्छेदः। द्विपदमिदं सूत्रम्।

पदार्थः - सुपि = अस्मद् शब्दात्, सुप् इति सप्तमीविभक्ति-बहुवचनप्रत्यये अनन्तरे स्थिते। **अम्हेसु** = **अम्हेसु** इति आदेशः स्यात्।

सूत्रार्थः - अस्मद् शब्दात्, सुप् इति सप्तमीविभक्तेः एकवचनप्रत्यये अनन्तरे स्थिते, सुप् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **अस्मासु** इति पदस्य स्थाने **अम्हेसु** इत्यादेशः स्यात्।

अथ रूपसिद्धिप्रक्रिया –

1.अस्मासु - अम्हेसु।

अस्मच्छब्दात् सप्तमीविभक्ति-बहुवचनविवक्षायां सुप्-प्रत्यये, अस्मद् + सुप् इति स्थिते, **अम्हेसु सुपि** (प्रा.प्र.सू.6.53) इति प्रस्तुतसूत्रेण सुप् इति प्रत्ययसहितस्य अस्मदः स्थाने अर्थात् सिद्धस्य **अस्मासु** इति पदस्य स्थाने, **अम्हेसु** इत्यादेशे **अम्हेसु** इति रूपं सिद्ध्यति।

द्विवचनस्य बहुवचनम्॥ (प्रा.प्र.सू.6.63) इति सूत्रात् प्राकृतभाषायां सर्वासां विभक्तीनां सुपां तिङां च द्विवचनस्य बहुवचनं प्रयोक्तव्यम्। **चतुर्थ्याः षष्ठी॥** (प्रा.प्र.सू.6.64) इति सूत्राच्च प्राकृतभाषायां चतुर्थीविभक्तेः स्थाने षष्ठीविभक्तिर्भवति।

दकारान्तः त्रिषु लिङ्गेषु समानः अस्मद् (=अम्ह) शब्दः

संस्कृतम्			**प्राकृतम्**	
एकवचनम्	बहुवचनम्	विभक्तिः	एकवचनम्	बहुवचनम्
अहम्	**वयम्**	प्रथमा	**अहं, हं, अहअं, अहम्मि, अम्मि, अम्हि**	**अम्हे, अम्हो, वअं, अम्हइ, इम्ह**
माम्, मा	**अस्मान्, नः**	द्वितीया	**मं, ममं, अहअं, अहम्मि, अम्मि, अम्हि**	**अम्हे, णो, अम्ह, अम्मह, अम्हो**
मया	**अस्माभिः**	तृतीया	**मे, मए, मइ, ममाइ, ममए, मयाइ**	**अम्हेहिं, अम्ह, अम्हे, णे**
मत्	**अस्मत्**	पञ्चमी	**मत्तो, मइत्तो, ममादो, ममादु, ममाहि, मज्झतो ममत्तो, महत्तो**	**अमत्तो, अम्हहं, अम्हेहिन्तो, अम्हेसुन्तो**
मह्यम्, मे / मम, मे	**अस्मभ्यम्, नः / अस्माकम्, नः**	चतुर्थी & षष्ठी	**मे, मम, मह, मज्झ, मज्झु, मझं**	**अम्ह, अम्हाणं, अम्हे**
मयि	**अस्मासु**	सप्तमी	**मइ, मए, ममम्मि, ममस्सिं, महम्मि, ममाइ**	**मज्झ, णो, मज्झाण, मज्झाणं, अम्हेसु, मज्झेसु, ममेसु, महेसु**

❍❍❍

संकेताक्षरसूची

प्रा.प्र.सू. = प्राकृतप्रकाशसूत्रसङ्ख्या

आधारग्रन्थसूची (Bibliography)

1	**आचार्यवररुचिप्रणीतः प्राकृतप्रकाशः -** पदच्छेद-पदार्थ-सूत्रानुवाद-मनोरमा-वृत्त्युपेतः, शशिप्रभाहिन्दीव्याख्या, परिशिष्टसमन्वितश्च। सम्पादकः - डॉ जमुना पाठक, व्याख्याकारः - डॉ. कृष्णदत्त मिश्र, चौखम्बा कृष्णदास अकादमी, वाराणसी। पो॰बानं॰ 1118, वाराणसी - २२१००१ दूरभाषः - (०५४२) - २३३३४५८. प्रथमसंस्करणम् - वि.सं. 2064, संवत् 2007.
2	**श्रीवररुचिप्रणीतः प्राकृतप्रकाशः -** श्रीभामहकृतमनोरमा व्याख्यासहितः। महामहोपाध्याय-श्रीमथुराप्रसाद-दीक्षितविरचित-चन्द्रिका-प्रदीप-संस्कृत-हिन्दीव्याख्याद्वयोपेतः। श्रीमदुदयरामशास्त्रिडबरालकृत-टिप्पणी-परिशिष्टाभ्यां विभूषितः। साहित्याचार्य-श्रीजगन्नाथशास्त्रिहोशिङ्गमहोदयेन भूमिकादिभिः सम्भूष्य संशोधितः। चौखम्बा-संस्कृत-सीरीज-आफिस्, वाराणसी - 1, वि.सं. 2016. 1959

❍❍❍

1	Name of the Researcher	**Dr. PATHAN MAHAMMAD VALI KHAN**
2	Title of Research Paper	**वररुचिप्रणीतप्राकृतप्रकाशदिशाऽस्मदशब्दरूपसिद्धिप्रक्रिया**
3	Designation	Guest Lecturer in Sanskrit Faculty of Humanities and Sciences, Sri Venkateswara Vedic Universtiy, **TIRUPATI** - 517 502, Andhra Pradesh
4	Educational Qualifications	B.A.O.L. in Sanskrit & M.A. in Sanskrit, M.Phil. in Sahitya, Ph.D. in Sahitya, SET in 2015 & NET in 2019.
4	Address	H.No. 4-10-S3-85, NEHRU NAGAR, Near Ramakrishna Deluxe Circle, **TIRUPATI** Chittoor District, ANDHRA PRADESH **PIN:** 517501
5	Mobile Number	**8885161850**
6	Email ID	mahammadvalipathan@gmail.com

❍❍❍

इदं शोधपत्रं समर्पयितुं मह्यमवकाशं कल्पितवद्भ्यः राष्ट्रियसंगोष्ठ्याः सभाध्यक्षेभ्यः, सत्राध्यक्षेभ्यः सञ्चालकेभ्यः **डा. N.R.S. नरसिंहमहोदयेभ्यः**, सत्रसञ्चालकेभ्यः **ब्रह्मश्री के. पुरुषोत्तमाचार्युलु** महोदयेभ्यः, उपस्थितेभ्यः पण्डितवर्येभ्यश्च हार्दान् धन्यवादान् समर्पयन् विरमामि विस्तरात्।।

इति शम्।।

28th 29th and 30th March, 2022